


WWJMRD 2021; 7(5): 43-45
www.wwjmrd.com
*International Journal*
*Peer Reviewed Journal*
*Refereed Journal*
*Indexed Journal*
*Impact Factor SJIF 2017: 5.182 2018: 5.51, (ISI) 2020-2021: 1.361*
*E-ISSN: 2454-6615*

**Dr. Menakarani Sahoo**
Assistant Professor of Sanskrit
P.G. Department of Sanskrit
Shailabala Women's (Auto)
College Cuttack, Odisha, India

# The impact of Co-Curricular Activities on Sanskrit Learning Process

## Dr. Menakarani Sahoo

**Abstract**
Education aims all round development of human personality such as physical, mental, social, emotional, spiritual, aesthetic and cultural develop. Modern education emphasizes on co-curricular activities. Because modern education believes that students shall be trained. So co-curricular activities bind a relationship bond between right knowledge and right action. Co-curricular activity teaches us 'Art of Living'. We can study the impact of co-curricular activity on the practical life of the students. By performing these activities the students can become able to express their ideas freely due to active participation in debate, seminar, conference, workshop, story, essay and poetry writing for school magazine, recitation, library work, symposium, indoor games and outdoor games, mass drill, parade, scouting, guiding, yogic asana, wrestling, bicycling, gardening, NCC (National cadet Corps), NSS (National Service Scheme), and ACC(Auxiliary Cadet Corps), music, painting, dancing drawing, sculpture, dramatics, exhibition, fancy dress, folk dance and folk songs, flower decoration festival etc. Co-curricular activities help a student to progress and achieve the goal. In this context we can take the example of "Taare Zameen Par". In this movie we can see how a student is helped by a teacher to overcome his weakness and prove his excellency in his interest. The motto of co-curricular activity "Teach me, and I will forget. show me and I might remember. Involve me and I will never forget."

**Keywords:** Patriotism, NSS, NCC, Hichki, Scout

**पाठ्यक्रमसहगामिक्रियायाः परिचयः**
वातावरणस्य प्रभावः मनुष्यस्योपरि दरीदृश्यते । मनुष्यः वातावरणादेव शिक्षाग्रहणं करोति । मनुष्यस्य जीवनम् आश्रमानुगुणमासीत् । चत्वार आश्रमाः यथा – ब्रह्मचर्याश्रमः , गार्हस्थ्याश्रमः, वानप्रस्थाश्रमः, संन्यासाश्रमश्च । ब्रह्मचर्याश्रमे शिष्यः गुरोः आश्रमे उषित्वा विद्याभ्यासं करोति । शिष्यस्य बौद्धिकमानसिकशक्तीनां विकासः गुरुकुले एव भवति । अतः गुरुः वेदाभ्यासेन सह अभिवादनस्य, आतिथ्यस्य, सेवायाः, त्यागस्य शिक्षां शिष्येभ्यः ददाति । छात्रस्य सामाजिक-भावनात्मक-नैतिक-सौन्दर्यात्मकविकासार्थं पाठयक्रमेषु पाठ्यसहगामिक्रियाणां योजनं करणीयम् । पाठ्यसहगामिक्रियासु क्रीडा, चित्रकला, नाटकम्, चर्चा, भाषणप्रतियोगिता, निबन्धलेखनप्रतियोगिता, पत्रिकालेखनम्, योगशिक्षा, पुष्पगुच्छनिर्माणम्, मूर्त्तिनिर्माणम्, शिल्पकला, संगीतम् प्रभृतीनां योजनमत्यावश्यकम् । अतः माध्यमिकशिक्षायोगानुसारं – 'सहशैक्षिक कार्यक्रमों का विद्यालय कार्यक्रम में उतना हि महत्वपूर्ण स्थान है, जितना पाठ्यक्रम सम्बन्धी कार्य का और उनके उपयुक्त संगठन हेतु उतनी सावधानी एवं विचारशीलता की आवश्यकता होती है । यदि इनको भलीभांति संचालित किया जाये तो मूल्यवान अभिवृत्तियों एवं गुणों के विकास में सहायक हो सकती है ।[i] छात्रं प्रति व्यवहारः मित्रवत् भवेदिति चाणक्यमहोदयस्य मतम् । तद्यथा-लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत् । प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ।
पाठ्यक्रमसहगामिक्रियायाः उद्देश्यम्

१. पाठ्यसहगामिक्रियायां छात्रः स्वतन्त्ररुपेण भागं गृह्णाति ।
२. अयं क्रार्यक्रमः छात्रस्य बौद्धिकज्ञानस्याभिवर्द्धने सहाय्यं प्रयच्छति ।
३. अनेन छात्राणां दमितभावनानां विकासः भवति ।
४. छात्रेषु 'संघे शक्तिः कलौ युगे' भावनायाः जागरणं भवति ।
५. अनेन छात्रस्य निर्णयक्षमता वर्द्धते ।
६. क्रीडामाध्यमेन छात्रस्य शारीरिकविकासः भवति ।
७. छात्रस्य आन्तरिकगुणानां बहिर्प्रकटनं भवति ।
८. अनेन शिक्षकः छात्राणां व्यवहाराणामध्ययनं कृत्वा तेषां व्यवहारेषु परिवर्तनमानयितुं चेष्टां करोति ।
९. कलोत्सवादीनामायोजनेन छात्रस्य सांस्कृतिकविकासः भवति ।

**Correspondence**:
**Dr. Menakarani Sahoo**
Assistant Professor of Sanskrit
P.G. Department of Sanskrit
Shailabala Women's (Auto)
College Cuttack, Odisha, India

१०. अनेन छात्रः स्वसमस्यायाः समाधानं कर्त्तुं प्रयत्नशीलः भवति ।
११. जातीयसेवायोजनायां (NSS) अंशग्रहणं कृत्वा भारतस्त एकताखण्डतायाः ज्ञानं प्राप्नोति । अनेन छात्रस्य हृदयेषु सेवाभावनायाः जागरणं भवति ।
१२. अनेन कार्यक्रमेण छात्रस्य नेतृत्वभावनायाः विकासः भवति ।
१३. अनेन छात्रस्य श्रवणशक्तेः, सर्जनात्मकशक्तेः, वाचनशक्तेश्च विकासः भवति ।
१४. छात्रेषु सहयोगभावनायाः विकासोऽभिवर्द्धते ।
१५. अनेन छात्राणां मनस्थितेः अध्ययनं सूकरं भवति ।

**संस्कृतशिक्षणे प्रयुज्यमानाः पाठ्यक्रमसहगामिक्रियाः-**

| शैक्षिकक्रियाः | सांस्कृतिकक्रियाः |
|---|---|
| **1.** भाषणम् | **1.** संस्कृतगीतम् |
| **2.** संस्कृतसम्भाषणशिविराणामायोजनम् | **2.** संस्कृतसप्ताहस्यायोजनम् |
| **3.** कविसम्मेलनम् | **3.** कवीनां जन्मदिवसानामायोजनम् |
| **4.** कथाकथनम् | **4.** रामायण-महाभारत-पुराणादीनां नाट्याभिनयः |
| **5.** निबन्धलेखनम् | **5.** संस्कृतैकाङ्की नाटकम् |
| **6.** संगोष्ठी | **6.** संस्कृतग्रन्थानां प्रदर्शनी |
| **7.** संस्कृतान्त्याक्षरी | **7.** वसन्तपञ्चम्यां गणेशचतुर्थ्याञ्च यज्ञयागादीनां निर्वहणम् |
| **8.** संस्कृतप्रश्नोत्तरस्पर्द्धाः | |
| **9.** समयस्यापूर्त्तिः | |
| **10.** प्रहेलिका | |
| **11.** श्लोकावृत्तिस्पर्द्धा | |
| **12.** संक्षिप्तकथालिखनम् | |
| **13.** वाद-विवादः | |

पाठ्यसहगामिक्रिया छात्राय समायोजनस्य शिक्षां प्रयच्छति । येन छात्रेषु प्रेम-स्नेह-सद्भाव-धैर्य-आत्मसंयम-सन्तोष-आशा-उत्साह-आनन्दप्रभृतीनां व्यावहारिकगुणानां विकासः परिलक्षते ।[ii]
यदि छात्रः केवलं पुस्तकज्ञानं प्राप्नोति तर्हि सः व्यावाहारिकजीवने ज्ञानस्य प्रयोगं कर्तुं न शक्नोति । अतः समाजे बालापराधानां अभिवृद्धिः जायते । अस्य कारणं भवति ज्ञानस्य समुचितप्रयोगः छात्रेण न क्रियते । अतः चाणक्यमहोदयेन प्रोक्तम्-

**पुस्तकेषु च या विद्या परहस्तेषु यद्धनम् ।**
**उत्पन्नेषु च कार्येषु न सा विद्या न तद्धनम् ।।**[iii]

**संस्कृतशिक्षणे प्रहेलिकाक्रीडायाः महत्त्वम्-**
पुरा प्रहेलिकायाः प्रयोगः ऋषिभिः क्रियते । ऋग्वेदे अस्य प्रमाणमुपलभ्यते –

**चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासोऽस्य ।**
**त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आ विवेश ।।**[iv]

श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेनापि प्रहेलिकायाः प्रयोगः कृतः । यथा-

**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।**
**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ।।**[v]

अस्योत्तरं भवत्यात्मा । न केवलं वैदिककाले लौकिकेऽपि संस्कृतशिक्षणे प्रहेलिकानां प्रयोगः शिक्षकैः क्रियते ।

**मेघश्यामोऽस्मि नो कृष्णो, महाकायो न पर्वतः ।**
**बलिष्ठोऽस्मि न भीमोऽस्मि, कोऽस्म्यहं नासिकाकरः ।।**[vi]

अहं मेघश्यामोऽस्मि परन्तु कृष्णः न । अहं महाकायोऽस्मि परन्तु न पर्वतः । अहं बलिष्ठोऽस्मि परन्तु न भीमः । नासिकाकरः अहं कोऽस्मि ? अस्याः प्रहेलिकायाः उत्तरं 'गजः' भवति ।
अपिच-

**नृत्यामि नित्यं धवलास्तरेषु,**
**संकेतिताङ्कैः प्रकटीकरोमि ।**
**भावं जनानां हृदयेषु गूढं,**
**कृष्णाननाऽऽलोच्य वदन्तु काऽहम्** ?[vii]

अर्थात् अहं नित्यं निर्मलप्रच्छदनेषु नृत्यामि । अहं जनानां हृदयेषु गुप्तं भावं संकेतिताङ्कैः प्रकटीकरोमि । श्यामवर्णमुखी का अहम् ? आलोच्य वदन्तु । अस्याः प्रहेलिकायाः उत्तरं 'लेखनी' भवति ।

**का पाण्डुपत्नी गृहभूषणं के,**
**को रामशत्रुः किमगस्त्यजन्म** ?
**सूर्यैकपुत्रो वद वेत्सि चेत्त्वं**
**कुन्ती-सुता रावणकुम्भकर्णाः ।।**[viii]

अर्थात् पाण्डुपत्नी का आसीत् ? गृहस्य भूषणानि कानि भवन्ति ? रामस्य शत्रुः कः आसीत् ? अगस्तत्यऋषेः जन्म कुत्र अभवत् ? सूर्यस्य एकपुत्रः कः आसीत् ? एतेषां प्रश्नानामुत्तरं एकस्मिन् वाक्यैव वर्तते । तद्यथा- कुन्ती-सुता-रावण-कुम्भ-कर्णाः ।

**छात्राणां कलात्मकविकासः**
ललितकलासु चित्रकला श्रेष्ठा भवति । अतः समराङ्गणसूत्रधारे वर्णितमस्ति –

**चित्रं हि सर्वशिल्पानां मुखं लोकस्य च प्रियम् ।**[ix]

पुरा चित्रकला देवमन्दिरेषु, राजप्रासादेषु, भवनेषु सर्वत्र प्राप्यते । चित्रकलायाः मनस्तात्विकविश्लेषणं मनोवैज्ञानिकैः कृतम् । मनोवैज्ञानिकानुसारं मनुष्यः स्वदमितभावानां अभिव्यक्तिः चित्रमाध्यमेन करोति । अस्य प्रमाणं उत्तरमेघे प्राप्यते ।'Taare Zameen Par' चलच्चित्रात् ज्ञायते यत् कथं शिक्षकः चित्रमाध्यमेन एव शिक्षणं ददाति । छात्राणाम् अन्तर्निहितगुणानां विकासार्थं चित्रकलायाः प्रतियोगिता शिक्षकैः क्रियते । 'Hichki' चलच्चित्रे रानीमुखर्जी उक्तवती यत् 'स्कूल के बाहर जब जिंदगी इम्तिहान लेती है तो सबजेक्ट वाइज नहीं लेती' । अस्मात् ज्ञायते यत् केवलं पाठ्यक्रमसम्बद्धशिक्षामाध्यमेन नापितु पाठ्यमहगामिक्रियामाध्यमेन यदि संस्कृतशिक्षणं दीयते तर्हि छात्राणां सर्वाङ्गीणविकासः जायते पाठ्येषु रूचिः आयाति च ।

**राष्ट्रसेवाभावनायाः जागरणम्**
'अहं राष्ट्री सङ्गमनी वसूनाम्', 'वयं राष्ट्रे जागृयाम पुरोहिताः', 'माता भूमिः पुत्रोऽहं पृथिव्याः', 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी', 'वसुधैव कुटुम्बकम्' इति देशभक्तेः भावना छात्राणां हृदयेषु जागरयितुं पाठ्यसहगामिक्रिययां स्काउट (Scout), गाइड् (Guide), एन.सी. सी . (NCC- National Credit Corps), एन . एस. एस (NSS- National Service Scheme) इत्यादीनां संयोजनं करणीयम् । डेनियल-वेब्स्टरमहोदयानुसारं – Let our object be, our country, our whole country , and nothing but our country. And by the blessing of God, May that country itself become a vast splendid monument, not of oppression and terror, but of wisdom, of peace and of liberty, upon which the world may gaze with admiration forever.[x]

**स्वास्थ्यस्योपरि पाठ्यसहगामिक्रियायाः प्रभावः –**
'शरीरमाद्यं खलुधर्मसाधनम्' इति न्यायेन प्रथमतः शरीरस्य स्वस्थता ततः परं अपरं कार्यम् । अरस्तूमहोदयानुसारं स्वस्थशरीरे स्वस्थमस्तिष्कस्य वास एव शिक्षा भवति । अतः शरीरस्य मनसश्च आरोग्यार्थं क्रीडा अनिर्वार्या । क्रीडा छात्राय जीवनमूल्यस्य शिक्षां ददाति । अर्थात् छात्रस्य जीवने विजयस्य पराजयस्य आवश्यकता

कथं वर्तते इति शिक्षयति । यदि पराजयः भवति तर्हि पुनः पुनः प्रयत्नेन छात्रः विजयं प्राप्तुं चेष्टते । अतः पाठ्यक्रमे पाठ्यसहगामिक्रियाणां संयोजनमवश्यं करणीयम् । तासु क्रियासु योगशिक्षा अवश्यं योजनीया ।

## निष्कर्षः

'पोथि पढ पढ जग मुआ पण्डित भयो न कोए' सत्यमेतत् वाक्यम् । गर्दभः स्वपृष्ठे चन्दनस्य भारं वहति परन्तुं चन्दनस्य मूल्यं सः न ज्ञात्वा तं सामान्यभारमिति चिन्तयति । गर्दभः इव अधुना छात्रः केवलं पाठं पठित्वा परीक्षायां सफलं भवितुं सर्वदा चेष्टते परन्तु सः विस्मरति यत् 'सा विद्या या विमुक्तये' । अतः 'शास्त्राण्यधीत्यापि भवन्ति मूर्खा यस्तु क्रियाबान् पुरुषः स विद्वान्' इति वाक्यमनुसृत्य छात्रः सर्वदा ज्ञानस्य व्यावहारिकपक्षस्य विश्लेषणं कृत्वा कार्यं कुर्यात् ।

---

1. डॉ०वशिष्ठ के.के ( १९८४ – ८५ ) विद्यालय संगठन और भारतीय समाज की समस्याएं , लाल बुक डिपो, पृ- १५
2. शर्मा, एच. के एवं सिहं, पी.के. 'स्वास्थय शिक्षा एवं शरीर विज्ञान' ( १९८८) पृष्ठ संख्या – ३३
3. चाणक्यनीतिदर्पणः- १६.२०
4. वैदिकसाहित्येतिहासः, पृ-१५३
5. श्रीमद्भगवद्गीता- २.२३
6. https://sanskritduniya.com/sanskrit-riddles
7. https://sanskritduniya.com/sanskrit-riddles
8. https://sanskritduniya.com/sanskrit-riddles
9. घोष, प्रो इला, 'कालिदास – साहित्य एवं कामक्ला' ईस्टर्न बुक लिंकर्स ( २००८ ), पृ – ७९
10. https://quotes.yourdictionary.com

**References**


1. ईशादि नौ उपनिषद्, शाङ्करभाष्य-गीताप्रेस ,गोरखपुर, २००२
2. गोयन्दका जयदलाल ( टीकाकार ) – श्रीमद्भगवद्गीता , गीताप्रेस, गोरखपुर, २०१०
3. चौधुरी, डॉ० गुञ्जेश्वर : चाणक्यनीतिदर्पणः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००५
4. मित्तलः,पो० सन्तोष- संस्कृतशिक्षणम्, नवचेतना पब्लिकेशन्स, जयपुरम्, २०१३
5. शर्मा, डॉ० च.ल.ना & सिंह, डॉ०फतेह- संस्कृतशिक्षणम् नवीनप्रविधयश्च, आदित्यप्रकाशनम्, जयपुरम्, १९९६
6. सिंह, डॉ०फतेह – शिक्षामनोविज्ञानम्, आदित्यप्रकाशनम्, जयपुरम्,२००५